विभज्यते द्विधा क्रियत इव। स पुरुषः। क्षतः उरःक्षतवान्। क्षतयं क्षीयते क्षीणो भवति। न केवलं सासृकफक्षयादेव क्षीणो भवति। तथा शुक्रौजसोः क्षयात्। व्यायामसेवनादिना शुक्रौजसोः क्षयादपि क्षीणो भवति ॥*॥ उरःक्षतस्य विशिष्टं लक्षणमाह।

'उरोरुक् शोणितच्छर्द्दिः कासो वैशेषिकः क्षते।
क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटिग्रहः ॥'

क्षते उरःक्षतवति। उरोरुक् शोणितच्छर्द्दिः कासो वैशेषिकः विशेषतो भवत्येव। तस्मिन्नेवोरःक्षतवति सासृकफशुक्रौजसां क्षयात् क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटिग्रहश्च भवति ॥*॥ निदानविशेषेणोरःक्षतस्य लक्षणविशेषमाह।

'व्यवायशोषात् क्षयाच्चैव कोष्ठात् प्रतिमलात्तथा।
क्षतोरस्कस्यान्नपाके निःश्वासो वाति पूतिकः ॥'

क्षयात् धातुक्षयहेतोरतिव्यवायादितः कोष्ठात् प्रतिमलात् कोष्ठात् प्रतिमलवातेन प्रतिलोमगमनात् पूतिकः पूतिगन्धः ॥ * ॥ उरःक्षतस्य साध्ययाप्यासाध्यलक्षणमाह।

'अल्पलिङ्गस्य दीप्ताग्नेः साध्यो बलवतो नवः।
परिसंवत्सरो याप्यः सर्व्वलिङ्गन्तु वर्जयेत् ॥'*॥

अथ राजयक्ष्मचिकित्सा।

'बलिनो बहुदोषस्य पञ्च कर्म्माणि कारयेत्।
यक्ष्मिणः क्षीणदेहस्य तत्तत्तं स्याद्विषोपमम् ॥
मलायत्तं बलं पुंसां शुक्रायत्तन्तु जीवनम्।
तस्माद्यत्नेन संरक्षेत् यक्ष्मिणो मलरेतसी ॥
शालिषष्टिकगोधूमयवमुद्गादयो हिताः।
मद्यानि जाङ्गलाः पक्षिमृगाः शस्ता विशोषिणः ॥
सपिप्पलीकं सयवं सकुलत्थं सनागरम्।
दाडिमामलकोपेतं स्निग्धमाजं रसं पिबेत् ॥
तेन षड्विनिवर्त्तन्ते विकाराः पीनसादयः ॥
इयतो द्विगुणं मांसं सर्व्वतोऽष्टगुणं जलम्।
पादस्थं संस्कृतश्चाज्ये षडङ्गो यूष उच्यते ॥'

तद्यथा। यवपल १ कुलत्थपल १ छागमांसपल ४ जलपल ४८ शेषपल १२ ततः पलमिते घृते संस्करणीयम्। तत्र कर्षमितं सैन्धवं देयं सौरभार्थं हिङ्गु च देयम्। पिप्पली नागरञ्च पृथक् माषमितं कल्कीकृत्य देयम्। दाडिमामलकाभ्यामम्लत्वं साध्यम्। षडङ्गयूषः ॥*॥

'ककुभत्वक् नागबला वानरीबीजं विचूर्णितं पयसा।
पक्वं मधुघृतयुक्तं ससितं यक्ष्मादिकासहरम् ॥
छागमांसं पयश्छागं छागं सर्पिश्च नागरम्।
छागोपसेवा शयनं छागमध्ये तु यक्ष्मनुत् ॥
मधुताप्यविडङ्गाश्मजतुलौहघृताभयाः।
घ्नन्ति यक्ष्माणमत्युग्रं सेव्यमाना हिताशिनः ॥'

ताप्यं स्वर्णमाक्षीकम्।

'शर्करामधुसंयुक्तं नवनीतं लिहन् क्षयी।
क्षीराशी लभते पुष्टिमतुल्ये चाज्यमाक्षिके ॥
सितोपलातुगाक्षीरीपिप्पलीबहुलात्वचः।
अन्त्यादूर्द्ध्वं द्विगुणितांशाश्चूर्णिता मधुसर्पिषा ॥
लेहयेद्राजरोगार्त्तं कासश्वासक्षयातुरम्।
पार्श्वशूलिनमल्पाग्निं सुप्तजिह्वं रुचिच्युतम्।
हस्तपादाङ्गदाहे च ज्वरे रक्ते तथोर्द्ध्वगे ॥'

सितोपला मिश्री। बहुला सूक्ष्मैला। इति सितोपलादिरवलेहः ॥*॥

'जातीफलं विडङ्गानि चित्रकं तगरं तिला।
तालीशं चन्दनं शुण्ठी लवङ्गमुपकुञ्चिका ॥
कर्पूरञ्चाभया धात्री मरीचं पिप्पली तुगा।
एषामक्षसमा भागाश्चातुर्जातकसंयुताः।
पलानि सप्त भङ्गायाः सिता सर्व्वसमा मता ॥
चूर्णमेतत् क्षयं कासं श्वासञ्च ग्रहणीगदम्।
अरोचकं प्रतिश्यायं तथा चानलमन्दताम्।
एतान् रोगान् निहन्त्येव वृक्षमिन्द्राशनिर्यथा ॥
बालरोगाधिकारोक्तं तैलं लाक्षादि योजयेत्।
अभ्यङ्गे यक्ष्मिणो नित्यं वृद्धवैद्योपदेशतः ॥'

इति जातीफलाद्यचूर्णम् ॥ * ॥

'वासकस्य रसप्रस्थं माक्षिकासितशर्करा।
पिप्पली द्विपलं तावत् सर्पिषश्च शनैः पचेत् ॥
तस्मिन् लेहत्वमायाते शीते क्षौद्रपलाष्टकम्।
दत्त्वावतारयेद्वैद्यो लीढ़ो लेहोऽयमुत्तमः ॥
निहन्ति राजयक्ष्माणं कासं श्वासञ्च दारुणम्।
पार्श्वशूलञ्च हृच्छूलं रक्तपित्तं ज्वरन्तथा ॥'

इति वासावलेहः ॥ * ॥

अथ व्यवायादिहेतुकशोषचिकित्सा। तत्र व्यवायशोषचिकित्सा।

'व्यवायशोषिणं क्षीररसमांसाज्यभोजनैः।
सुकूलैर्मधुरैर्हृद्यैर्जीवनीयैरुपाचरेत् ॥'

रसो मांसरसः सुकूलैर्हितैः ॥ * ॥ शोकशोषचिकित्सा।

'हर्षणाश्वासनैः क्षीरैः स्निग्धैर्मधुरशीतलैः।
दीपनैर्लघुभिश्चान्नैः शोकशोषमुपाचरेत् ॥'*॥

व्यायामशोषचिकित्सा।

'व्यायामशोषिणं स्निग्धैः क्षतक्षयहितैर्हिमैः।
उपाचरेज्जीवनीयैर्विधिना श्लैष्मिकेण तु ॥'*॥

अध्वशोषचिकित्सा।

'आस्यासुखैर्दिवास्वप्नैः शीतैर्मधुरवृंहणैः।
अन्नमांसरसाहारैरध्वशोषमुपाचरेत् ॥'*॥

व्रणशोषचिकित्सा।

'व्रणशोषं जयेत् स्निग्धैर्दीपनैः स्वादुशीतलैः।
ईषदम्लैरनम्लैर्व्वा यूषमांसरसादिभिः ॥'*॥

अथोरःक्षतचिकित्सा।

'बलाश्वगन्धा श्रीपर्णी बहुपुत्री पुनर्नवा।
पयसा नित्यमभ्यस्ताः शमयन्ति क्षतक्षयम् ॥'

श्रीपर्णी गम्भारी। बहुपुत्री शतावरी। इति बलादिचूर्णम् ॥*॥

'एला पत्रत्वचो द्राक्षा पिप्पल्यर्द्धपलं पृथक्।
सितामधुकखर्ज्जूरमृद्वीकाश्च पलोन्मिताः ॥
संचूर्ण्य मधुना युक्ता वटिका संप्रकल्पयेत्।
अक्षमात्रा ततश्चैव भक्षयेच्च दिने दिने ॥
क्षतक्षयं ज्वरं कासं श्वासं हिक्कां वमिं भ्रमम्।
मूर्च्छां मदं तृषां शोषं पार्श्वशूलमरोचकम् ॥
प्लीहानमामवातञ्च रक्तपित्तं स्वरक्षयम्।
एलादिगुटिका हन्ति वृष्या सन्तर्पणी परा ॥
द्राक्षायाः प्रस्थमेकन्तु मधूकस्य पलाष्टकम्।
पचेत्तोयाढके शुद्धे पादशेषेण तेन तु ॥
पलिके मधुकद्राक्षे पिष्टे कृष्णापलद्वयम्।
प्रदाय सर्पिषः प्रस्थं पचेत् क्षीरे चतुर्गुणे ॥
सिद्धे शीते पलान्यष्टौ शर्करायाः प्रदापयेत्।
एतद्द्राक्षाघृतं सिद्धं क्षतक्षीणे सुखावहम् ॥
वातपित्तज्वरश्वासविस्फोटकहलीमकान्।
प्रदरं रक्तपित्तञ्च हन्यान्मांसबलप्रदम् ॥'

इति द्राक्षादिघृतम् ॥*॥

'क्षीरे धात्रीविदारीक्षुवरीणाञ्च तथा रसे।
पचेत् समे घृतप्रस्थं मधुरैः कर्षसम्मितैः ॥
द्राक्षाद्विचन्दनोशीरशर्करोत्पलपद्मकैः।
मधूककुसुमानन्ताकाश्मरीवृषसंज्ञकैः ॥
प्रस्थार्द्धं मधुनः शीते शर्करार्द्धतुलान्तथा।
पलार्द्धकांश्च संचूर्ण्य त्वगेलापत्रकेशरान् ॥
विनीय तत्र संलिह्यान्मात्रां नित्यं सुयन्त्रितः।
अमृतप्राशमित्येतदश्विभ्यां परिकीर्त्तितम् ॥
क्षीरमांसाशिनां हन्ति रक्तपित्तक्षतक्षयम्।
तृष्णारुचिश्वासकासच्छर्द्दिमूर्च्छाप्रमर्दनम्।
मूत्रकृच्छ्रज्वरघ्नञ्च बल्यं स्त्रीरतिवर्द्धनम् ॥'

इति अमृतप्राशावलेहः ॥*॥

'यद्यच्च तर्पणं शीतमविदाहि हितं लघु।
अन्नपानं निषेव्यन्तत् क्षतक्षीणैः सुखार्थिभिः ॥
शोकं स्त्रियः क्रोधमसूयताञ्च
त्यजेदुदारान् विषयान् भजेच्च।
तथा द्विजातींस्त्रिदशान् गुरूंश्च
वाचश्च पुण्याः श्रृणुयाद्द्विजेभ्यः ॥'*॥

अथ राजयक्ष्मणि रसाः। अमृतेश्वरो रसो राजयक्ष्मणि रसेन्द्रचिन्तामणौ।

'रसभस्मामृतासत्त्वं लौहं मधुघृतान्वितम्।
अमृतेश्वरनामायं महाशुक्रो राजयक्ष्मजित् ॥'

इति अमृतेश्वरो रसः ॥

रसभस्म मारितो रसः। अमृतासत्त्वं गुडूचीसत्त्वम्। लौहं मारितम् ॥ * ॥

'चयोऽंशा मारितात् सूतादेकोऽंशो हेमभस्मतः।
एकोऽंशो मृतताम्रस्य शिला गन्धश्च तालकम्।
प्रत्येकं भागयुग्मं स्यादेतत् सर्व्वं विचूर्णयेत् ॥
वराटीः पूरयेत्तेन छागीक्षीरेण टङ्कणम्।
पिष्ट्वा तेन मुखं रुद्ध्वा मृद्भाण्डे ताश्च पूरयेत् ॥
ततो गजपुटे पक्त्वा चूर्णयेत् स्वाङ्गशीतलम्।
रसो राजमृगाङ्कोऽयं चतुर्गुञ्जः क्षयापहः ॥
मरिचैरूनविंशत्या कणाभिर्दशभिस्तथा।
मधुना सर्पिषा चापि दद्यादेतं रसं भिषक् ॥
अनेन नश्यति क्षिप्रं वातश्लेष्मभवक्षयः ॥'

इति राजमृगाङ्को रसो राजयक्ष्मणि रसेन्द्रचिन्तामणौ ॥*॥

'शुद्धसूतं द्विधा गन्धं कुर्य्यात् खल्वेन कज्जलीम्।
तयोः समं तीक्ष्णचूर्णं मर्द्दयेत् कन्यकाद्रवैः ॥
त्रियाममातपे गोलं ताम्रपात्रे विधारयेत्।